## अपे क्लेशतमसोः। (५०/२९६७)

अपपूर्वात् हन्तेः [1]धातोः क्लेशतमसोः कर्मणोरुपपदयोः डप्रत्ययो भवति। क्लेशापहः पुत्रः। तमोपहः सूर्यः। अनाशीरर्थ आरम्भः॥

## कुमारशीर्षयोर्णिनिः। (५१/२९६८)

[2]हन इति वर्तते। [3]कुमार शीर्ष इत्येतयोः उपपदयोः हन्तेः[4] णिनिः प्रत्ययो भवति। कुमारघाती। शीर्षघाती। निपातनाच् छिरसः शीर्षभावः॥

## लक्षणे जायापत्योष्टक्। (५२/२९६९)

हन्तेः[5] जायापत्योः कर्मणोः उपपदयोः लक्षणवति कर्तरि टक् प्रत्ययो भवति। जायाघ्नो ब्राह्मणः। पतिघ्नी वृषली। [6]अथ वा लक्षणे द्योत्ये टक् प्रत्ययः[7]॥

## अमनुष्यकर्तृके च। (५३/२९७०)

अमनुष्यकर्तृके[8] वर्तमानाद् हन्तेः धातोः कर्मणि उपपदे टक् प्रत्ययो भवति। [9]जायाघ्नस्तिलकालकः। पतिघ्नी [10]पाणिरेखा। श्लेष्मघ्नं मधु। पित्तघ्नं घृतम्[11]। [12]अमनुष्यकर्तृके इति किम्? आखुघातः शूद्रः। इह कस्मान् न भवति, चौरघातो हस्ती? 'कृत्यल्युटो बहुलम्' (३.३.११३/२८४१) इति [13]बहुलवचनाद् अण् [14]भवति॥

## शक्तौ हस्ति[15]कपाटयोः। (५४/२९७१)

शक्तौ गम्यमानायां हस्ति[16]कपाटयोः कर्मणोरुपपदयोः हन्तेः[17] टक् प्रत्ययो भवति। मनुष्यकर्तृकार्थ आरम्भः। हस्तिनं हन्तुं [18]शक्तः हस्तिघ्नः मनुष्यः। [19]कं पाटयति प्रविशत इति कपाटघ्नश्चौरः। शक्तौ इति किम्? विषेण हस्तिनं हन्ति हस्तिघातः॥

## पाणिघताडघौ शिल्पिनि। (५५/२९७२)

पाणिघ ताडघ इत्येतौ शब्दौ निपात्येते शिल्पिनि कर्तरि[20]। पाणि ताड इत्येतयोः कर्मणोः उपपदयोः

---

1. धातोः नास्ति ब. ग. ह. 2. वाक्यमिदं नास्ति ब. फ. 3. कुमारशीर्षयोः कर्मणोः क. ब. फ. ह. 4. धातोः इत्यधिकम् ब. फ. ह, णिनिप्रत्ययो ह. 5. धातोः इत्यधिकम् अ. क. ह, कर्तरि हन्तेः धातोः फ. 6. अथवा – प्रत्ययः नास्ति ह. 7. भवति इत्यधिकम् क. 8. धात्वर्थे इत्यधिकम् क. ड. फ. ह. 9. उदाहरणमिदं नास्ति फ. 10. रेषा क, पाणिलेखा ड. 11. वातघ्नं तैलम् इत्यधिकम् अ. ब. क. ड. फ. ह. 12. अमनुष्येव फ. 13. बहुल नास्ति ह. 14. भविष्यति ब. ड. फ. 15–16. कवाटयोः ह. ब. क. 17. धातोः इत्यधिकम् ह. 18. समर्थः फ. ह. 19. कं . . . इति नास्ति अ. ब. क. ड. 20. वाच्ये इत्यधिकम् अ. क.